॥ अथ अच्युताष्टकम्॥

अच्युतं केशवं राम नारायणं कृष्ण दामोदरं वासुदेवं हरिम् ॥
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे ॥ १ ॥
अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितम् ॥
इन्दिरा मन्दिरं चेतसा सुन्दरं देवकीनन्दनं नन्दनं संदधे ॥ २ ॥
विष्णवे जिष्णवे शङ्खिने चक्रिणे रुक्मिनी रागिने जानकी जानये ॥
वल्लवी वल्लभायाऽर्चितायात्मने कंस विध्वंसिने वंशिने ते नमः ॥ ३ ॥
कृष्ण गोविन्द हे राम नारायण श्रिपते वासुदेवाचित श्रिनिधे ॥
अच्युतानन्त हे माधवाधोक्षज द्वारका नायक द्रौपदी रक्षक ॥ ४ ॥
राक्षसक्षोभितः सीतयाशोभितो दण्डकारण्य भू पुण्यता कारणः ॥
लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्संपूजितो राघवः पातु माम् ॥ ५ ॥
धेनुकारिष्टकोऽनिष्टकृद् द्वेषिणां केशिहा कंसहृद् वंशिकावादकः ॥
पूतनाकोपकः सूरजा खेलनो बाल गोपालकः पातु माम सर्वदा ॥ ६ ॥
विद्युदुद्धयोतवान प्रस्फुरद्वाससं प्रावृडम्भोदवत् प्रोल्लसद्विग्रहम् ॥
वन्यया मालया शोभितोरस्थलं लोहितांघ्रिद्वयं वारिजाक्षं भजे ॥ ७ ॥
कुञ्चितैः कुन्तलैर्भ्राजिमाननं रत्नमौलिं लसत् कुण्डलं गण्डयोः ॥
हारकेयूरकं कङ्कण प्रोज्ज्वलं किङ्किणी मञ्जुलं श्यामलं तं भजे ॥ ८ ॥

This one is easy, very rythmic and quick. I've put a double space
in the middle of each 1/2 shloka (wherever possible).Each 1/2 shloka is
divided into two thus: 3 + 3 (akshara). So the whole shloka is :
3 - 3 – 3 - 3 — 3 - 3 – 3 - 3 — —-
3 - 3 – 3 - 3 — 3 - 3 – 3 - 3 ——
where as usual the '-' indicates the RELATIVE & APPROXIMATE pause time.
I hope this is clear.